BARASAT GOVT COLLEGE LIBRARY "10 K.N.C Road, Barasat, Kol-124"

**WEST BENGAL STATE UNIVERSITY**
B.A. Honours 2nd Semester Examination, 2022

# SANACOR03T-SANSKRIT (CC3)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

## SECTION-A

1. यथाभिमतं कस्यचिदेकस्य प्रश्नस्योत्तरं प्रदेयम्। 10×1 = 10

(क) तारापीडस्य मन्त्री कः आसीत् ? मन्त्रिणः उपदेशाः संक्षेपेण आलोचनीयाः। 2+8

(ख) 'वाणोच्छिष्टं जगत् सर्वम्' – वचनस्यास्य तात्पर्य्यं शुकनासोपदेशमाधारीकृत्य निरुपयत। 10

2. अधोलिखितेषु यथेच्छं त्रयं संस्कृतभाषया देवनागरीलिप्या च व्याख्येयम्। 5×3 = 15

(क) गुरुपदेशश्च नाम पुरुषाणामखिलमलप्रक्षालनक्षममजलं स्नानमनुपजातपलितादिवैरुप्यमजरं वृद्धत्वमनारोपितमेदोदोषं गुरुकरणमसुवर्णविरचनमग्राम्यं कर्णाभरणमतीतज्योतिरालोको नोद्वेगकरः प्रजागरः।

(ख) अभिषेकानन्तरं च प्रारब्धदिग्विजयः परिभ्रमन् विजितामपि तव पित्रा सप्तद्वीपभूषणां पुनर्विजयस्व वसुन्धराम्।

(ग) गर्भेश्वरत्वमभिनवयौवनत्वमप्रतिमरुपत्वममानुषशक्तित्वञ्चेति महतीयं खल्वनर्थपरम्परा। सर्वाविनयानामेकैकमप्येषामायतनम्, किमुत समवायः।

(घ) त्वगन्तरिततृतीयलोचनं स्वललाटमाशङ्कन्ते।

(ङ) कमलिनीसञ्चरणव्यतिकरलग्ननलिननालकण्टकक्षतेव न क्वचिन्निर्भरमाबघ्नाति पदम्।

अथवा

अधोनिर्दिष्टं विषयत्रयमाश्रित्य संस्कृतभाषया देवनागरीलिप्या च टीकां लिखतु। 5×3 = 15

(i) व्यसनम् ; (ii) लक्ष्मीमदः ; (iii) अभिचारक्रिया ; (iv) सप्तद्वीपा ; (v) वडवानलः ।

## SECTION-B

3. अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योत्तरं प्रदेयम्। 10×1 = 10

(क) अनन्तवर्मा कः आसीत् ? कः आसीत् वसुरक्षितः ? अनन्तवर्माणं प्रति वसुरक्षितस्योपदेशाः आलोचनीयाः। 1+1+8

(ख) 'तत्कथाख्यायिकेत्येका जातिः संज्ञाद्वयाङ्किता' इति पाठ्यविषयमवलम्ब्य विचार्यताम्। 10

BARASAT GOVT COLLEGE LIBRARY 10 K N C Road, Barasat, Kol-124

4. यथेच्छं पञ्च प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः। 2×5 = 10

(क) दशकुमारचरितम् इति ग्रन्थः केन रचितः ? कः ग्रन्थस्यास्याधारग्रन्थः ?

(ख) कर्म कतिविधम् ? के च तद्भेदाः ?

(ग) कं पण्डितं बुधाः वदन्ति ?

(घ) 'अधीष्व तावद्दण्डनीतिम्' – कं प्रति कस्योक्तिरियम् ?

(ङ) 'महाभाग, क्लिष्टस्य मे क्रियतामार्य साहाय्यकम्' – कमुद्दिश्य केन इदमुक्तम् ?

(च) योगक्षेमौ कौ ?

(छ) 'राज्यं नाम शक्तित्रयायत्तम्' – केन एवं विचिन्तितम् ? शक्तित्रयञ्च किम् ?

5. अधोलिखितेषु विषयेषु यथेच्छमेकमाश्रित्य संस्कृतभाषया देवनागरीलिप्या च टीकां लिखत। 5×1 = 5

(i) हितोपदेशः ; (ii) सुबन्धुः ; (iii) सिंहासनद्वात्रिंशिका ; (iv) अम्बिकादत्तव्यासः।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——

BARASAT GOVT COLLEGE LIBRARY "10 K N C Road, Barasat, Kol-124"

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 2nd Semester Examination, 2022

## SANACOR04T-SANSKRIT (CC4)

Time Allotted: 2 Hours　　　　Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A
(**Marks:** 20)

1. अधोलिखित कश्चिदेकः समाधेयः – 10×1 = 10

(क) ज्ञानस्य श्वरुपं तथा तस्य अर्जनसाधनानि भगवद्गीतामाश्रित्य विचार्यन्ताम्।

(ख) अष्टधा प्रकृतिः का ? विशदी क्रियताम्।

2. अधोविन्यस्तेषु पञ्च प्रश्नाः संस्कृतेन देवनागर्या च समाधेयाः – 2×5 = 10

(क) तमोगुणे वृद्धिं प्राप्ते सति किं भवति ?

(ख) "ऋषिभिः बहुधा गीतं छन्दोभिर्विविधैः पृथक्" – अत्र श्लोके ऋषिभिः किं गीतमिति प्रोक्तम् ?

(ग) किं तावत् सत्त्वगुणस्वरूपम् ?

(घ) कः योगारुढः उच्यते ?

(ङ) इन्द्रियेभ्यः परं किम् ? कथं तस्य परत्वम् ?

(च) जीवः कथं विषयान् उपसेवते ?

(छ) "मनो दुर्निग्रहं चलम्" – कथं मनसः दुर्निग्रहत्वं चलत्वं च सिध्यति ?

(ज) मनः कानि इन्द्रियाणि आश्रित्य विषयानुपसेवते ?

### SECTION-B
(**Marks:** 25)

3. अधोलिखितेषु एकः प्रश्नः समाधेयः – 10×1 = 10

(क) श्रीमद्भगवद्गीतामाश्रित्य मनसः स्वरूपं पर्यालोच्यताम्।

(ख) श्रीमद्भगवद्गीतामनुसृत्य योगस्य स्वरूपमुच्यताम्। निष्कामेण कर्मणा किं लभ्यते ?

BARASAT GOVT COLLEGE LIBRARY

4. अधोलिखितेषु श्लोकेषु त्रयाणां संस्कृतेन देवनागर्यालिप्या च व्याख्या कार्या – 5×3 = 15

(क) इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि॥

(ख) चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्।
तस्याह निग्रहं मन्ये वायोरिव सुदुष्करम्॥

(ग) श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्दियः।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति॥

(घ) तत्रैव सति कर्तारमात्मानं केवलं तु यः।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः॥

(ङ) रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन्।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति॥

## SECTION-C

**(Marks:** 5)

5. अधोलिखितेषु एकं विषयमाश्रित्य संस्कृतेन देवनागरीलिप्या च टीका लेख्याः 5×1 = 5

(i) पार्थः ; (ii) कर्मफलम् ; (iii) इन्द्रियाणि।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——

BARASAT GOVT COLLEGE LIBRARY "10 K N C Road, Barasat, Kol-124"

## WEST BENGAL STATE UNIVERSITY

B.A. Honours 2nd Semester Examination, 2021

## SANACOR03T-SANSKRIT (CC3)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. यथाविहितं कस्यचिदेकस्य प्रश्नस्योत्तरं प्रदेयम्। 10×1 = 10

(क) महाकविवाणभट्टेन विरचितायाः कादम्बर्याः शुकनासोपदेशमनुसृत्य लक्ष्म्याः चरित्रं निंरूप्यताम्।

(ख) वाणभट्टस्य रचनाशैली वर्ण्यताम्।

2. अधोलिखितेषु यथेच्छं त्रयं संस्कृतभाषया देवनागरीलिप्या च व्याख्येयम्। 5×3 = 15

(क) चन्दनप्रभवो न दहति किमनलः ? किंवा प्रशमहेतुनापि न प्रचण्डतरीभवति वडवानलो वारिणा ?

(ख) आरूढप्रतापो हि राजा त्रैलोक्यदर्शीव सिद्धादेशो भवतीति।

(ग) मिथ्यामाहात्म्यगर्वनिर्भराश्च न प्रणमन्ति देवताभ्यः, न पूजयन्ति द्विजातीन्, न मानयन्ति मान्यान्, नार्चयन्त्यर्चनीयान्, नाभिवादयन्त्यभिवादनार्हान्, नाभ्युत्तिष्ठन्ति गुरून्।

(घ) तथापि भवद्गुणसन्तोषो मामेवं मुखरीकृतवान्।

(ङ) इन्द्रियहरिणहारिणी च सततमतिदुरन्तेयमुपभोगमृगतृष्णिका।

अथवा

अधोनिर्दिष्टं विषयत्रयमाश्रित्य टीका लेख्या। 5×3 = 15

(क) गन्धर्वनगरलेखा (ख) वडवानलः (ग) मृगतृष्णिका (घ) कुसुमशरः (ङ) कालकूटः।

### SECTION-B

3. अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योत्तरं प्रदेयम्। 10×1 = 10

(क) चन्द्रपालितेन वर्णितस्य व्यसनस्य गुणाः संक्षेपेण आलोचनीयाः।

(ख) 'दण्डिनः पदलालित्यमि'ति विद्वद्वचनतात्पर्य्यं वैशद्येन विवृणुत।

BARASAT GOVT COLLEGE 10 K.N.C Road, Barasat, Kol-124 LIBRARY

4. अधोलिखितेषु प्रश्नेषु यथेच्छं पञ्च प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः। 2×5 = 10

(क) 'विश्रुतचरितम्' कस्य ग्रन्थस्य अंशः ? अस्य ग्रन्थस्य रचयिता कः ?

(ख) राजविद्याः कतिविधाः ? काश्च ताः ?

(ग) कः वसुरक्षितः ? स कम् उपदिष्टवान् ?

(घ) विहारभद्रस्य परिचय उपस्थाप्यताम्।

(ङ) के तावत् षड्गुणाः ?

(च) 'क्लिष्टस्य मे क्रियतामाचार्य साहाय्यकम्' — कं प्रति कस्योक्तिरियम् ?

(छ) के तावद्राजानः रिपुषट्कं जेतुमसमर्थाः आसन् ?

## SECTION-C

5. अधोलिखितेषु विषयेषु यथेच्छमेकमाश्रित्य संस्कृतभाषया देवनागरीलिप्या च टीकां लिखत। 5×1 = 5

(क) दण्डी (ख) पञ्चतन्त्रम् (ग) वेतालपञ्चविंशतिः।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——

BARASAT GOVT COLLEGE LIBRARY 10 K.N.C Road, Barasat, Kol-124

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 2nd Semester Examination, 2021

## SANACOR04T-SANSKRIT (CC4)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

(**Marks:** 20)

1. अधोलिखितेषु एकः प्रश्नः समाधेयः — 10×1 = 10

(क) ज्ञानस्य स्वरूपं तथा ज्ञानार्जनस्य साधनानि श्रीमद्भगवद्गीतामाश्रित्य विचार्यताम्।

(ख) सत्वरजस्तमसां स्वरूपाणि कार्याणि च श्रीमद्भगवद्गीतायाः चतुर्दशाध्यायानुसारं लिख्यन्ताम्।

2. अधोविन्यस्तेषु पञ्च प्रश्नाः संस्कृतेन देवनागर्या च समाधेयाः — 2×5 = 10

(क) इन्द्रियेषु मनसः परा का भवति ? कथं सा परा भवति ?

(ख) 'इन्द्रियाणि पराण्याहुः' — अत्र पराणि पदस्य कोऽर्थः ? कथमिन्द्रियाणि पराणि भवन्ति ?

(ग) मनः कथं षष्ठमिन्द्रियमिति गीतायाः द्वादशाध्यायानुसारं लेख्यम्।

(घ) अष्टधा प्रकृतिः का ?

(ङ) 'एतत् क्षेत्रं समासेन सविकारमुदाहृतम्' — अत्र क्षेत्रं नाम किम् ?

(च) असंयतात्मना योगो दुष्प्राप्यः कथं भवति ?

(छ) कः योगारूढः उच्यते ?

(ज) 'मनो दुर्निग्रहं चलम्' — कथं मनसः दुर्निग्रहत्वं चलत्वं च सिध्यति ?

### SECTION-B

(**Marks:** 25)

3. अधोलिखितेषु एकः प्रश्नः समाधेयः — 10×1 = 10

(क) श्रीमद्भगवद्गीतानुसारं मनसः स्वरूपं पर्यालोच्यताम्।

(ख) श्रीमद्भगवद्गीतायाः भक्तियोगे भक्तविषये यदुक्तं तत् समासेन आलोच्यताम्।

BARASAT GOVT COLLEGE LIBRARY "10 K N C Road, Barasat, Kol-124"

4. अधोनिबद्धेषु श्लोकेषु त्रयाणां संस्कृतेन देवनागर्या च व्याख्या कार्या 5×3 = 15

(क) क्लैव्यं मास्म गमः पार्थ नैतत् त्वय्युपपद्यते।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप॥

(ख) चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥

(ग) व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम्॥

(घ) काम एष क्रोध एष रजोगुणसमुद्भवः।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्॥

(ङ) नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।
शरीरयात्रापि च ते न प्रसिध्येदकर्मणः॥

## SECTION-C

**(Marks:** 5)

5. अधोलिखितेषु एकं विषयमाश्रित्य संस्कृतेन देवनागर्या च टीका लेख्याः 5×1 = 5

(क) वासुदेवः; (ख) अर्जुनः; (ग) अचला श्रद्धा।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——

BARASAT GOVT COLLEGE LIBRARY "10 K N C Road, Barasat, Kol-124"

लक्ष्यं विज्ञानम्

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 2nd Semester Examination, 2020

## SANACOR03T-SANSKRIT (CC3)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. यथाभिमतं कस्यचिद् एकस्य प्रश्नस्योत्तरं प्रदेयम्। 10×1 = 10

(क) तारापीडस्य मन्त्री कः आसीत् ? मन्त्रे उपदेशः संक्षेपेण विव्रियताम्। 2+8

(ख) 'वाणोच्छिष्टं जगत् सर्वम्'– अस्योक्तेः यथार्थता निरूप्यताम्। 10

2. अधोलिखितेषु यथेच्छं त्रयं संस्कृतभाषया देवनागरलिप्या च व्याख्येयम्। 5×3 = 15

(क) निसर्गत एव अभानुभेद्यम् रत्नालोकच्छेद्यमप्रदीप-प्रभापनेयमतिगहनं तमो यौवनप्रभवम्।

(ख) यौवनारम्भे च प्रायः शास्त्रजल-प्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः।

(ग) मनसा देवताध्यारोपणप्रतारणादसम्भूत-सम्भावनोपहताश्च अन्तःप्रविष्टापरपरभूजद्व-यमिवात्मबाहुयुगलं सम्भावयन्ति।

(घ) त्वगन्तरिततृतीयलोचनं स्वललाटमाशङ्कन्ते।

(ङ) अभिषेकानन्तरं च प्रारब्धदिग्विजयः परिभ्रमन् विजितामपि तव पित्रा सप्तद्वीपभूषणां पुनर्विजयस्व वसुन्धराम्।

अथवा

अधोलिखितेषु विषयेषु यथेच्छं त्रयमाश्रित्य संस्कृतभाषया देवनागरलिप्या च टीकां लिखतु। 5×3 = 15

(i) तिमिरान्धत्वम्, (ii) गुरूपदेशः, (iii) वृद्धत्वम्, (iv) महापातकः, (v) अभिचारक्रिया, (vi) सप्तद्वीपा।

### SECTION-B

3. अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योत्तरं प्रदेयम्। 10×1 = 10

(क) कः आसीत् विहारभद्रः ? अनन्तवर्माणं प्रति विहारभद्रस्य कटुपदेशाः आलोचनीयाः। 2+8

(ख) 'तत्कथाख्यायिकेत्येका जातिः संज्ञाद्वयाङ्किता' इति पाठ्यविषयमवलम्ब्य विचार्यताम्। 10

BARASAT GOVT COLLEGE LIBRARY

4. अधोलिखितेषु प्रश्नेषु यथेच्छं पञ्च प्रश्नाः संस्कृतभाषया देवनागरलिप्या च समाधेयाः। 2×5 = 10

(क) विश्रुतचरितम् इति ग्रन्थः केन रचितः ? ग्रन्थस्य मूलग्रन्थः कः ?

(ख) कुत्र विश्रुतेन अष्टवर्षदेशीयबालकः दृष्टः ?

(ग) कतिसंख्याकैः कैश्च फलैः बालकस्य प्राणरक्षा अभवत् ?

(घ) बुद्धिहीनः राजा केन अभिभूतो भूत्वा आत्मानं न जानाति ?

(ङ) कर्म कतिविधम् ? के च तद्भेदाः ?

(च) बुधाः कं पण्डितं वदन्ति ?

(छ) 'हस्तं प्रसारयन्नेवोत्तिष्ठति'– कः किमर्थं हस्तं प्रसारयति ?

(ज) योगक्षेमौ कौ ?

## SECTION-C

5. अधोलिखितेषु विषयेषु यथेच्छमेकमाश्रित्य संस्कृतभाषया देवनागरलिप्या च टीकां लिखतु। 5×1 = 5

(i) हर्षचरितम्, (ii) हितोपदेशः, (iii) पुरुषपरीक्षा, (iv) अम्बिकादत्तव्यासः।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——

BARASAT GOVT COLLEGE LIBRARY "10 K N C Road, Barasat, Kol-124"

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 2nd Semester Examination, 2020

## SANACOR04T-SANSKRIT (CC4)

Time Allotted: 2 Hours Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

(**Marks:** 20)

1. अधस्तनेषु एकः प्रश्नः समाधेयाः। 10×1 = 10

(क) श्रीमद्भगवद्गीतानुसारम् आत्मनः स्वरूपं वर्णनीयम्।

(ख) गुणत्रयाणां कः श्रेष्ठः ? तस्य उत्कर्षः श्रीमद्भगवद्गीतानुसारेण प्रदर्शनीयः।

2. अधोलिखितेषु पञ्च प्रश्नाः संस्कृतेन देवनागरलिप्या च समाधेयाः। 2×5 = 10

(क) श्रीमद्भगवद्गीतायाः उत्सः कः भवति ?

(ख) 'परतस्तु सः'— तत्पदेन कः बोध्यः ? तस्य स्वरूपं किम् ?

(ग) 'प्रकृतिस्थानि कर्षति'— कथं कानि प्रकृतिस्थानि ? कश्च कर्षति ?

(घ) 'विषयानुपसेवते'— कः कानि आश्रित्य किम् उपसेवते ?

(ङ) 'मे भिन्ना प्रकृतिरष्टधा'— अत्र कस्य प्रकृतिः उक्ता ? प्रकृतेः अष्टौ भेदाः के भवन्ति ?

(च) क्षेत्रं नाम किं भवति ?

(छ) जीवदेहे तमोगुणस्य प्रभावः कीदृशः भवति ?

(ज) महाभूतानि कतिविधानि ? तेषां नामानि उल्लिख्यन्ताम्।

### SECTION-B

(**Marks:** 25)

3. अधोलिखितेषु एकः प्रश्नः समाधेयः — 10×1 = 10

(क) श्रीमद्भगवद्गीतायां वर्णिता ज्ञानयोगस्य प्रशस्तिः वर्णनीया।

(ख) तपसः स्वरूपं निरूप्य भेदः प्रदर्शनीयः।

BARASAT GOVT COLLEGE LIBRARY "10 K N C Road, Barasat, Kol-124"

4. अधस्तनेषु श्लोकेषु त्रयाणां संस्कृतेन देवनागरलिप्या च व्याख्या कार्या। 5×3 = 15

(क) यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः।
धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत्॥

(ख) इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि॥

(ग) आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च॥

(घ) तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञानासिनात्मनः।
छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत॥

(ङ) असंशयं महावाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते॥

## SECTION-C

**(Marks: 5)**

5. अधोलिखितेषु एकं विषयमाश्रित्य संस्कृतेन देवनागरलिप्या च टीका लेख्या। 5×1 = 5

(i) श्रीकृष्णः, (ii) कर्मफलम् (iii) भक्तिमान्।

अथवा

अधोलिखितयोरेकस्य व्याख्या सुरगिरा देवनागरलिप्या च करणीया। 5×1 = 5

(क) यत् करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्॥

(ख) अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः॥

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——

BARASAT GOVT COLLEGE LIBRARY "10 K N C Road, Barasat, Kol-124"

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 2nd Semester Examination, 2019

## SANACOR03T-SANSKRIT (CC3)

Time Allotted: 2 Hours — Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. यथाभिमतं कस्यचिदेकस्य प्रश्नस्योत्तरं प्रदेयम्। 10×1 = 10

(क) महाकविवाणभट्टेन विरचितायां कादम्बर्यां शुकनासोपदेशम् अनुसृत्य लक्ष्म्याः चरित्रं निरूप्यताम्।

(ख) "वाणोच्छिष्टं जगत् सर्वम्"– वचनस्यास्य तात्पर्य्यं शुकनासोपदेशमाधारीकृत्य निरूपयत।

2. अधोलिखितेषु यथेच्छं त्रयं संस्कृतभाषया देवनागरीलिप्या च व्याख्येयम्। 5×3 = 15

(क) गर्भेश्वरत्वमभिनवयौवनत्वमप्रतिमरूपत्वममानुषशक्तित्वञ्चेति महतीयं खल्वनर्थपरम्परा। सर्वाविनयानामेकैकमप्येषामायतनम्, किमुत समवायः।

(ख) गङ्गेव वसुजनन्यपि तरङ्गबुद्बुदचञ्चला। दिवसकरगतिरिव प्रकटितविविधसंक्रान्तिः। पातालगुहेव तमोबहुला। हिडिम्बेव भीमसाहसैकहार्यहृदया। प्रावृडिवाचिरद्युतिकारिणी। दुष्टपिशाचीव दर्शितानेकपुरुषोच्छ्राया स्वल्पसत्त्वमुन्मत्तीकरोति।

(ग) इन्द्रियहरिणहारिणी च सततमतिदुरन्तेयमुपभोगमृगतृष्णिका।

(घ) सरस्वतीपरिगृहीतमीर्ष्ययेव नालिङ्गति जनम्, गुणवन्तमपवित्रमिव न स्पृशति, उदारसत्त्वममङ्गलमिव न बहु मन्यते, सुजनमनिमित्तमिव न पश्यति, अभिजातमहिमिव लङ्घयति, शूरं कण्टकमिव परिहरति।

(ङ) मिथ्यामाहात्म्यगर्वनिर्भराश्च न प्रणमन्ति देवताभ्यः, न पूजयन्ति द्विजातीन्, न मानयन्ति मान्यान्, नार्चयन्त्यर्चनीयान्, नाभिवादयन्त्यभिवादनार्हान्, नाभ्युत्तिष्ठन्ति गुरून्।

अथवा

अधोलिखितेषु विषयेषु यथेच्छं त्रयमाश्रित्य संस्कृतभाषया देवनागरीलिप्या च टीकां लिखत। 5×3 = 15

(क) गन्धर्वनगरलेखा, (ख) व्यसनम्, (ग) लक्ष्मीमदः, (ङ) मृगतृष्णिका,
(च) दर्पदाहज्वरोष्मा।

BARASAT GOVT COLLEGE LIBRARY

## SECTION-B

3. अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योत्तरं प्रदेयम्। $10 \times 1 = 10$

(क) विहारभद्रः कः आसीत् ? अनन्तवर्माणं प्रति तस्योपदेशाः आलोचनीयाः।

(ख) ''दण्डिनः पदलालित्यम्'' इति विद्वद्वचनतात्पर्य्यं वैशद्येन विवृणुत।

4. यथेच्छं पञ्च प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः – $2 \times 5 = 10$

(क) विश्रुतचरितस्य मूलग्रन्थः कः ? ग्रन्थकारस्य नाम किम् ?

(ख) ''अधीष्व तावद्दण्डनीतिम्''– केन कमुद्दिश्य इदमुक्तम् ?

(ग) के तावत् षड्गुणाः ?

(घ) कति राजविद्याः ?

(ङ) ''हस्तप्रसारयन्नेवोत्तिष्ठति'' – केन कदा किमर्थं हस्तप्रसारणं कृतम् ?

(च) के तावद्राजानः रिपुषट्कं जेतुमसमर्थाः आसन् ?

(छ) ''राज्यं नाम शक्तित्रयायत्तम्''– केन एवं विचिन्तितम् ? शक्तित्रयञ्च किम् ?

## SECTION-C

5. अधोलिखितेषु विषयेषु यथेच्छमेकमाश्रित्य संस्कृतभाषया देवनागरीलिप्या च टीकां लिखत। $5 \times 1 = 5$

(क) सुबन्धुः, (ख) शुकसप्ततिः, (ग) पञ्चतन्त्रम्।

——×——

BARASAT GOVT COLLEGE "10 K N C Road, Barasat, Kol-124" LIBRARY

लक्ष्यं विश्वमानम्

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 2nd Semester Examination, 2019

## SANACOR04T-SANSKRIT (CC4)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### क-विभागः (20 अङ्काः)

1. अधोलिखितेषु एकः प्रश्नः समाधेयाः $10\times1 = 10$

(क) ज्ञानस्य स्वरूपं तथा ज्ञानार्जनस्य साधनानि श्रीमद्भगवद्गीतामाश्रित्य विचार्यताम्।

(ख) गुणस्वरूपं तथा गुणानां कार्याणि श्रीमद्भगवद्गीतायाः चतुर्दशाध्यायानुसारं लिख्यन्ताम्।

2. अधोविन्यस्तेषु पञ्च प्रश्नाः संस्कृतेन देवनागरलिप्या च समाधेयाः $2\times5 = 10$

(क) 'इन्द्रियाणि' कतिविधानि ?

(ख) 'इन्द्रियाणि पराण्याहुः'– अत्र पराणि इति पदस्य कोऽर्थः ? कथमिन्द्रियाणि पराणि भवन्ति ?

(ग) 'ममैवांशो जीवलोक' इत्यत्र मम इति पदेन कस्योल्लेखः ? कस्तस्य अंशः ?

(घ) 'इन्द्रियाणि दशैकञ्च'– अत्र केषामिन्द्रियाणां ग्रहणम् ?

(ङ) 'एतत् क्षेत्रं समासेन सविकारमुदाहृतम्'– अत्र क्षेत्रं नाम किम् ?

(च) लोभप्रमादौ कुतः जायेते ?

(छ) कः योगारुढः उच्यते ?

(ज) मनः कानि इन्द्रियाणि आश्रित्य विषयानुपसेवते ?

### ख-विभागः (25 अङ्काः)

3. अधोलिखितेषु एकः प्रश्नः समाधेयः $10\times1 = 10$

(क) श्रीमद्भगवद्गीतानुसारं मनसः प्रकृतिः पर्यालोच्यताम्।

(ख) श्रीमद्भगवद्गीतायाः द्विवितीयेऽध्याये मनसः नियन्त्रणविषये यदुक्तं तत् समासेन आलोच्यताम्।

4. अधोनिबद्धेषु श्लोकेषु त्रयाणां संस्कृतेन देवनागरलिप्या च व्याख्या कार्या – $5\times3 = 15$

(क) धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय॥

BARASAT GOVT COLLEGE LIBRARY "10 K N C Road, Barasat Kol-124"

(ख) किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात्॥

(ग) व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम्॥

(घ) काम एष क्रोध एष रजोगुणसमुद्भवः।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्॥

(ङ) श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति॥

## ग-विभागेः (05 अङ्काः)

5. अधोलिखितेषु एकं विषयमाश्रित्य संस्कृतेन देवनागरलिप्या च टीका लेख्या – 5×1 = 5

(क) प्रियः भक्तः।

(ख) श्रीमद्भगवद्गीता।

(ग) अचला श्रद्धा।

अथवा

अधोलिखितयोरेकस्य व्याख्या सुरगिरा देवनागरलिप्या च करणीया। 5×1 = 5

(क) यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति।
शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः॥

(ख) ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः॥

——×——